# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. FOURTH SEMESTER EXAMINATION, MAY 2025**
**SECOND YEAR (BATCH 2023-27)**
**SANSKRIT**

Date : 03/05/2025
Time : 11.00 am – 1.00 pm
**Paper : 4SANMJC1**
Full Marks : 50

1. कस्यचि**<u>देकस्य</u>** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

   क) स्वप्नवासवदत्तमिति नाटकस्य पञ्चमाङ्कमनुसृत्य स्वप्नदृश्यं वर्ण्यताम्। नाटकस्य नामकरणस्य याथार्थ्यं प्रतिपाद्यताम्। (7+3)

   ख) स्वप्ननाटके नायक: क: ? तस्य चरित्रं वर्ण्यताम्। (1+9)

2. अधोलिखितेषु श्लोकेषु कस्यचि**<u>देकस्य</u>** वङ्गभाषया अनुवाद: करणीय:। [1×3]

   क) कामेनोज्जयिन्यां गते मयि तदा कामप्यवस्थां गते
   दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषव: पातिता:।
   तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं
   पञ्चेषुर्मदनो यदा कथमयं षष्ठ: शर: पातित:।।

   ख) ऋज्वायतां च विरलां च नतोन्नतां च
   सप्तर्षिवंशकुटिलां च निवर्तनेषु।
   निर्मुच्यमानभुजगोदरनिर्मलस्य
   सीमामिवाम्बरतलस्य विभज्यमानाम्।।

3. कस्यच**<u>नैकस्य</u>** श्लोकस्य व्याख्या कार्या। [1×7]

   क) क: कं शक्तो रक्षितुं मृत्युकाले
   रज्जुच्छेदे के घटं धारयन्ति।
   एवं लोकस्तुल्यधर्मो वनानां
   काले काले छिद्यते रुह्यते च।।

   ख) गुणानां वा विशालानां सत्काराणां च नित्यश:।
   कर्तार: सुलभा लोकेविज्ञातारस्तु दुर्लभा:।।

4. कस्यचि**<u>देकस्य</u>** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

   क) शाकुन्तलनाटके का हंसपदिका ? सा कस्मिन् अङ्के दृश्यते ? तत्सङ्गीतस्य नाटकीयतात्पर्यं विविच्यताम्। (1+1+8)

   ख) दुष्यन्त–शकुन्तलयो: मिलनं कथं कालिदासेन प्रदर्श्यते ? विशदेन आलोच्यताम्।

5. अधस्तनयो**<u>रेक:</u>** वङ्गाङ्गलान्यतरभाषयानुद्यताम्। [1×4]

   क) रम्याणि वीक्ष्य मधुरांश्च <u>निशम्य</u> शब्दान्
   पर्युत्सुको भवति यत्सुखितोऽपि जन्तु:।
   तच्चेतसा स्मरति नूनमबोधपूर्वं
   <u>भावस्थिराणि</u> जननान्तरसौहृदानि।।

   ख) शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
   पर्णस्वान्तरलीनतां विजहति <u>स्कन्धोदयात्</u> पादपा:।
   सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यपगा:
   <u>केनाप्युत्क्षिपतेव</u> पश्य भुवनं मत्पार्श्वमानीयते।।

6. प्रसङ्गनिर्देशपुरःसरं कश्चि**देकः** श्लोको व्याख्यायताम्। [1×7]

क) भवन्ति नम्रास्तरवः फलागमै-
नर्वाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

ख) अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया सश्रितानाम्।।

7. **सर्वे** प्रश्नाः समाधेयाः। [6]

क) नवाम्बुभिर्दूरविलम्बिनः अथवा केनाप्युत्क्षिपतेव इति पदे सन्धिविच्छेदः कार्यः। (1)

ख) 'भावस्थिराणि' अथवा 'तनुभावनष्टसलिला' इति पदे सविग्रहः समासो विलिख्यताम्। (1+1)

ग) निशम्य अथवा अनुद्धताः इति पदे प्रकृतिप्रत्ययनिर्देशः कार्यः। (1)

घ) स्कन्धोदयात् अथवा फलागमैः इति पदे विभक्तिकारकं निर्णीयताम्। (1+1)

8. कस्यचि**देकस्य** प्राकृतभाषातः संस्कृतभाषायां रूपान्तरं क्रियताम्। [1×3]

क) आतम्महरिअपडुर जीविद सन्त वासन्तमासस्य।
दिट्ठो सि चूदकरोअ उदुमगल तुम पसाएमि।।

ख) शहजे किल जे विणिन्दिए ण हु दे कम्म विवज्जणीअए।
पशुमालणकम्मदालुणे अणुकम्पामिदु एव्व शोत्तिए।।

———— × ————